श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ प्रथमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ प्रथमः सर्गः ॥

## श्रीरामस्य राजसभायां महर्षीणामागमनं तैः सह तस्य वार्तालापः श्रीरामस्य प्रश्नाश्च

प्राप्तराज्यस्य रामस्य राक्षसानां वधे कृते।
आजग्मुर्मुनयः सर्वे राघवं प्रतिनन्दितुम्॥ **7.1.1** ॥

कौशिकोऽथ यवक्रीतो गार्ग्यो गालव एव च।
कण्वो मेधातिथेः पुत्रः पूर्वस्यां दिशि ये श्रिताः॥ **7.1.2** ॥

स्वस्त्यात्रेयश्च भगवान् नमुचिः प्रमुचिस्तथा।
अगस्त्योऽत्रिश्च भगवान् सुमुखो विमुखस्तथा॥ **7.1.3** ॥

आजग्मुस्ते सहागस्त्या ये श्रिता दक्षिणां दिशम्।
नृषङ्गुः कवषो धौम्यः कौशेयश्च महानृषिः॥ **7.1.4** ॥

तेऽप्याजग्मुः सशिष्या वै ये श्रिताः पश्चिमां दिशम्।
वसिष्ठः कश्यपोऽथात्रिर्विश्वामित्रः सगौतमः॥ **7.1.5** ॥

जमदग्निर्भरद्वाजस्तेऽपि सप्तर्षयस्तथा।
उदीच्यां दिशि सप्तैते नित्यमेव निवासिनः॥ **7.1.6** ॥

सम्प्राप्यैते महात्मानो राघवस्य निवेशनम्।
विष्ठिताः प्रतिहारार्थं हुताशनसमप्रभाः॥ **7.1.7** ॥

वेदवेदाङ्गविदुषो नानाशास्त्रविशारदाः।
द्वाःस्थं प्रोवाच धर्मात्मा अगस्त्यो मुनिसत्तमः॥ **7.1.8** ॥

निवेद्यतां दाशरथेर्ऋषयो वयमागताः।
प्रतीहारस्ततस्तूर्णमगस्त्यवचनाद् द्रुतम्॥ **7.1.9** ॥

समीपं राघवस्याशु प्रविवेश महात्मनः।
नयेङ्गितज्ञः सद्वृत्तो दक्षो धैर्यसमन्वितः॥ **7.1.10** ॥

स रामं दृश्य सहसा पूर्णचन्द्रसमद्युतिम्।
अगस्त्यं कथयामास सम्प्राप्तमृषिसत्तमम्॥ **7.1.11** ॥

श्रुत्वा प्राप्तान् मुनींस्तांस्तु बालसूर्यसमप्रभान्।
प्रत्युवाच ततो द्वाःस्थं प्रवेशय यथासुखम्॥ **7.1.12** ॥

दृष्ट्वा प्राप्तान् मुनींस्तांस्तु प्रत्युत्थाय कृताञ्जलिः।
पाद्यार्घ्यादिभिरानर्च गां निवेद्य च सादरम्॥ **7.1.13** ॥

रामोऽभिवाद्य प्रयत आसनान्यादिदेश ह।
तेषु काञ्चनचित्रेषु महत्सु च वरेषु च॥ **7.1.14** ॥

कुशान्तर्धानदत्तेषु मृगचर्मयुतेषु च।
यथार्हमुपविष्टास्ते आसनेष्वृषिपुङ्गवाः॥ **7.1.15** ॥

रामेण कुशलं पृष्टाः सशिष्याः सपुरोगमाः।
महर्षयो वेदविदो रामं वचनमब्रुवन्।
कुशलं नो महाबाहो सर्वत्र रघुनन्दन॥ **7.1.16** ॥

त्वां तु दिष्ट्या कुशलिनं पश्यामो हतशात्रवम्।
दिष्ट्या त्वया हतो राजन् रावणो लोकरावणः॥ **7.1.17** ॥

नहि भारः स ते राम रावणः पुत्रपौत्रवान्।
सधनुस्त्वं हि लोकांस्त्रीन् विजयेथा न संशयः॥ **7.1.18** ॥

दिष्ट्या त्वया हतो राम रावणो राक्षसेश्वरः।
दिष्ट्या विजयिनं त्वाद्य पश्यामः सह सीतया॥ **7.1.19** ॥

लक्ष्मणेन च धर्मात्मन् भ्रात्रा त्वद्धितकारिणा।
मातृभिर्भ्रातृसहितं पश्यामोऽद्य वयं नृप॥ **7.1.20** ॥

दिष्ट्या प्रहस्तो विकटो विरूपाक्षो महोदरः।
अकम्पनश्च दुर्धर्षो निहतास्ते निशाचराः॥ **7.1.21** ॥

यस्य प्रमाणाद् विपुलं प्रमाणं नेह विद्यते।
दिष्ट्या ते समरे राम कुम्भकर्णो निपातितः॥ **7.1.22** ॥

त्रिशिराश्चातिकायश्च देवान्तकनरान्तकौ।
दिष्ट्या ते निहता राम महावीर्या निशाचराः॥ **7.1.23** ॥

कुम्भश्चैव निकुम्भश्च राक्षसौ भीमदर्शनौ।
दिष्ट्या तौ निहतौ राम कुम्भकर्णसुतौ मृधे॥ **7.1.24** ॥

युद्धोन्मत्तश्च मत्तश्च कालान्तकयमोपमौ।
यज्ञकोपश्च बलवान् धूम्राक्षो नाम राक्षसः॥ **7.1.25** ॥

कुर्वन्तः कदनं घोरमेते शस्त्रास्त्रपारगाः।
अन्तकप्रतिमैर्बाणैर्दिष्ट्या विनिहतास्त्वया॥ **7.1.26** ॥

दिष्ट्या त्वं राक्षसेन्द्रेण द्वन्द्वयुद्धमुपागतः।
देवतानामवध्येन विजयं प्राप्तवानसि॥ **7.1.27** ॥

सङ्ख्ये तस्य न किञ्चित् तु रावणस्य पराभवः।
द्वन्द्वयुद्धमनुप्राप्तो दिष्ट्या ते रावणिर्हतः॥ **7.1.28** ॥

दिष्ट्या तस्य महाबाहो कालस्येवाभिधावतः।
मुक्तः सुररिपोर्वीर प्राप्तश्च विजयस्त्वया॥ **7.1.29** ॥

अभिनन्दाम ते सर्वे संश्रुत्येन्द्रजितो वधम्।
अवध्यः सर्वभूतानां महामायाधरो युधि॥ **7.1.30** ॥

विस्मयस्त्वेष चास्माकं तं श्रुत्वेन्द्रजितं हतम्।
एते चान्ये च बहवो राक्षसाः कामरूपिणः॥ **7.1.31** ॥

दिष्ट्या त्वया हता वीरा रघूणां कुलवर्धन।
दत्त्वा पुण्यामिमां वीर सौम्यामभयदक्षिणाम्॥ **7.1.32** ॥

दिष्ट्या वर्धसि काकुत्स्थ जयेनामित्रकर्शन।
श्रुत्वा तु वचनं तेषां मुनीनां भावितात्मनाम्॥ **7.1.33** ॥

विस्मयं परमं गत्वा रामः प्राञ्जलिरब्रवीत्।
भगवन्तः कुम्भकर्णं रावणं च निशाचरम्॥ **7.1.34** ॥

अतिक्रम्य महावीर्यौ किं प्रशंसथ रावणिम्।
महोदरं प्रहस्तं च विरूपाक्षं च राक्षसम्॥ **7.1.35** ॥

मत्तोन्मत्तौ च दुर्धर्षौ देवान्तकनरान्तकौ।
अतिक्रम्य महावीरान् किं प्रशंसथ रावणिम्॥ **7.1.36** ॥

अतिकायं त्रिशिरसं धूम्राक्षं च निशाचरम्।
अतिक्रम्य महावीर्यान् किं प्रशंसथ रावणिम्॥ **7.1.37** ॥

कीदृशो वै प्रभावोऽस्य किं बलं कः पराक्रमः।
केन वा कारणेनैष रावणादतिरिच्यते॥ **7.1.38** ॥

शक्यं यदि मया श्रोतुं न खल्वाज्ञापयामि वः।
यदि गुह्यं न चेद् वक्तुं श्रोतुमिच्छामि कथ्यताम्॥ **7.1.39** ॥

शक्रोऽपि विजितस्तेन कथं लब्धवरश्च सः।
कथं च बलवान् पुत्रो न पिता तस्य रावणः॥ **7.1.40** ॥

कथं पितुश्चाप्यधिको महाहवे
शक्रस्य जेता हि कथं स राक्षसः।
वराश्च लब्धाः कथयस्व मेऽद्य
पाप्रच्छतश्चास्य मुनीन्द्र सर्वम्॥ **7.1.41** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे प्रथमः सर्गः॥